## सभायाः यः । (१०५/१६५७)

सभाशब्दाद् यः प्रत्ययो भवति तत्र साधुः इत्येतस्मिन् [1]विषये । यतोऽपवादः । स्वरे विशेषः । सभायां साधुः सभ्यः ॥

## ढश्छन्दसि । (१०६/३४५८)

सभाशब्दाड् ढः प्रत्ययो भवति तत्र साधुः इत्येतस्मिन् विषये छन्दसि । यस्यापवादः । [2]'सभेयो युवाऽस्य यजमानस्य वीरो जायताम्' (वा. सं. २२.२२) ॥

## समानतीर्थे वासी । (१०७/१६५८)

साधुः इति निवृत्तम् । वासी इति प्रत्ययार्थः । समानतीर्थशब्दात् तत्र इति सप्तमीसमर्थाद् वासी इत्येतस्मिन्नर्थे [3]यत् प्रत्ययो भवति । [4]समानतीर्थे वासी इति सतीर्थ्यः । समानोपाध्यायः इत्यर्थः । [5]तीर्थशब्देनेह गुरुरुच्यते ॥

## समानोदरे शयित ओ चोदात्तः । (१०८/१६५९)

समानोदरशब्दात् सप्तमीसमर्थात् शयितः इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति, ओकारश्चोदात्तः[6] । शयितः स्थितः इत्यर्थः । समानोदरे शयितः समानोदर्यः भ्राता ॥

## सोदराद् यः । (१०९/१६६०)

सोदरशब्दात् सप्तमीसमर्थात् शयितः इत्येतस्मिन्नर्थे [7]यः प्रत्ययो भवति । 'विभाषोदरे' (६.३.८८/१०१६) इति [8]सूत्रेण यकारादौ प्रत्यये विवक्षिते प्रागेव समानस्य सभावः । समानोदरे शयितः सोदर्यः भ्राता । ओ चोदात्तः (४.४.१०८/१६५९) इति नानुवर्तते । यकारे स्वरः ॥

## भवे छन्दसि । (११०/३४५९)

तत्र [9]इत्येव । सप्तमीसमर्थात् भव इत्येतस्मिन्नर्थे छन्दसि विषये यत् प्रत्ययो भवति । [10]अणादीनां [11]घादीनां चापवादः । सति दर्शने तेऽपि भवन्ति, [12]सर्वविधीनां छन्दसि व्यभिचारात् । 'नमो मेध्याय च विद्युत्याय च [13]नमः' (तै.सं. ४.५.७.१६) । आपादपरिसमाप्तेः छन्दोऽधिकारः । [14]भवाधिकारश्च 'समुद्राभ्राद्घः' (४.४.११८/३४६४) इति यावत्[15] ॥

---

1. अर्थे फ. ह. 2. संसभेयः ह, सभेयोऽस्य युवा यजमानस्य धीरो जीयात् क. 3. यत् नास्ति ब, प्रत्ययः नास्ति फ. 4. समाने तीर्थे गुरौ वसति ड. फ. 5. शब्दशक्तिस्वाभाव्यात् समानस्य सभावः, तीर्थे यः इत्यधिकम् ब. क. ड. इ. ई. ज. फ. ह. 6. भवति इत्यधिकम् फ. ह. 7. यत् क. फ. 8. सूत्रेण नास्ति फ. 9. एव नास्ति ह. ज. 10. तत्र भवे इत्यधिकम् ड. 11. राष्ट्रावारपाराद् इत्यधिकम् ड. 12. सर्वविधानात् ह. 13. नमः नास्ति ई. 14. भवाधिकारश्च नास्ति ड. 15. इति केचित् इत्यधिकम् ड.